छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
सुन्दरी १०।११ वृत्तिः।	अयुजोर्यदि सौ जगौ युजोः सभराः लगौ यदि सुन्दरी तदा	
प्रथमे तृतीये पादे च	।।ऽ,।।ऽ,।ऽ।,ऽ	यदवोचदवेक्ष्य सुन्दरी परितः स्नेहमयेन चक्षुषा।
द्वितीये चतुर्थे पादे च	।।ऽ,ऽ।।,ऽ।ऽ,।,ऽ	अपि कंसहरस्य दुर्वचं वचनन्तद्विदधीत विस्मयम्॥
इत्यर्द्धसमवृत्तानि समाप्तानि॥*		
अथ विषमवृत्तानि।		
उद्गता	प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यनन्तरम्। यद्यथ भनभगाः स्युरथो सजसा जगौ च भवतीयमुद्गता॥	
प्रथमे पादे १०	।।ऽ,ऽ।।,।।ऽ,।	विललास गोपरमणीषु तरङ्गितनयाप्रभोद्गता।
द्वितीये १०	।।।,।।ऽ,ऽ।।,ऽ	कृष्णनयनचकोरयुगे दधती सुधांशुकिरणोर्मिविभ्रमम्॥
तृतीये १०	ऽ।।,।।।,ऽ।।,ऽ	
चतुर्थे १३	।।ऽ,ऽ।।,।।ऽ,ऽ।।,ऽ	
अन्यविधोद्गता	प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यनन्तरम्। यद्यथ भनजलगाः स्युरथो सजसा जगौ च भवतीयमुद्गता॥	
प्रथमे पादे १०	।।ऽ,ऽ।।,।।ऽ,।	अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम्।
द्वितीये १०	।।।,।।ऽ,ऽ।।,ऽ	क्लान्तिरहितमभिराधयितुं विधिवत्तमांसि विदधे धनञ्जयः॥
तृतीये ११	ऽ।।,।।।,ऽ।।,।,ऽ	इति भारवाद्गताभेदः। १२।१॥
चतुर्थे १३	।।ऽ,ऽ।।,।।ऽ,ऽ।।,ऽ	
सौरभम्	त्रयमुद्गता सदृशमेव पदमिह तृतीयमन्यथा। जायते रनभगैर्ग्रथितं कथयन्ति सौरभकमेतदीदृशम्॥	
प्रथमे पादे १०	।।ऽ,ऽ।।,।।ऽ,।	परिभूतफुल्लमृतपवनविहृतगन्धविभ्रमा।
द्वितीये १०	।।।,।।ऽ,ऽ।।,ऽ	कस्य हृदि हरतीह हरे सुखपद्मसौरभकला तवाद्भुता॥
तृतीये १०	ऽ।ऽ,।।।,ऽ।।,ऽ	
चतुर्थे १३	।।ऽ,ऽ।।,।।ऽ,ऽ।।,ऽ	
ललितम्	नयुगं सकारयुगलञ्च भवति चरणे तृतीयके। तदुदितसुरमतिभिर्ललितं यदि शेषमस्य सकलं यथोद्गता।	
प्रथमे पादे १०	।।ऽ,ऽ।।,।।ऽ,।	व्रजसुन्दरी समुदयेन मुदितमनसा स्म पीयते।
द्वितीये १०	।।।,।।ऽ,ऽ।।,ऽ	हिमकरगलितमिवामृतकं ललितं मुरारिमुखचन्द्रविच्युतम्॥
तृतीये १२	।।।,।।।,।।ऽ,।।ऽ	
चतुर्थे १३	।।ऽ,ऽ।।,।।ऽ,ऽ।।,ऽ	
वक्त्रम्	वक्त्रं युगभ्यां मगौ स्यातामन्त्यैर्यो गुरुभिः ख्यातम्।	
प्रथमे पादे ८	ऽऽऽऽ।ऽऽऽ	वक्त्राम्भोजं सदा स्मेरं चक्षुर्नीलोत्पलं फुल्लम्।
द्वितीये ८	ऽऽऽऽ।ऽऽऽ	वल्लवीनां मुरारातेश्चेतोभृङ्गं जहारोच्चैः॥
तृतीये ८	ऽ।ऽऽ।ऽऽऽ	
चतुर्थे ८	ऽऽऽऽ।ऽऽऽ	
पथ्यावक्त्रम्	युजोश्चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्तितम्।	
प्रथमे पादे ८	ऽ।ऽ।।ऽऽ।	रासकेलिमलघ्वास्य कृष्णस्य मधुवासरे।
द्वितीये ८	ऽऽ।।।ऽ।ऽ	आसीद्गोपन्दगाचीनां पथ्या वक्त्रमधुस्रुतिः॥
तृतीये ८	ऽऽऽ।।ऽऽऽ	
चतुर्थे ८	ऽऽऽ।।ऽ।ऽ	